National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(36): 210-212
© 2021 NJHSR
www.sanskritarticle.com

**डॉ. ध्रुवजित् शर्मा**
सहायकाचार्य:, संस्कृतविभाग:,
दरङ् महाविद्यालय:
(गुवाहाटिविश्वविद्यालयान्तर्गत:),
तेजपुरम्, शोणितपुरमण्डलम्,
असमप्रदेश:, 784001

**Correspondence:**
**डॉ. ध्रुवजित् शर्मा**
सहायकाचार्य:, संस्कृतविभाग:,
दरङ् महाविद्यालय:
(गुवाहाटिविश्वविद्यालयान्तर्गत:),
तेजपुरम्, शोणितपुरमण्डलम्,
असमप्रदेश:, 784001

# साम्प्रतिककाले दौलोत्सवस्य परम्परायाः गुरुत्वम् प्रासङ्गिकत्वञ्च - चिन्तनमेकम्

**डॉ. ध्रुवजित् शर्मा**

**शोधसार:**

साधारणत: यस्य आयोजनेन जना: नवकर्मप्रेरणया उद्‌बुद्धा: भवन्ति स एव उत्सव: इति वक्तुं शक्यते। पृथिव्या: भिन्ना: जात्युपजाति-धर्मावलम्बिनै: जनै: भिन्नेषु समयेषु भिन्ना: उत्सवा: आयोज्यन्ते। फल्गुत्सव: होलि उत्सवो वा वर्णोत्सव: भवति। उत्सवमिमं वसन्तस्य हर्षोल्लासस्य आनन्दस्य च प्रतीकरूपेण मन्यते। प्राचीनकालात् अद्यावधि भारतवर्षस्य भिन्नधर्मावलम्बिनै: विशेषत: हिन्दुधर्मावलम्बिनै: लोकै: उत्सवोऽयं अनुष्ठीयते। दौलोत्सवः सर्वसाधारणानां कृते प्रियः उत्सवः अस्ति। दौलोत्सव: नामधेय: इदं पर्व भारतीयपर्वसु गुरुत्वपूर्णमस्ति। अधुना राष्ट्रियपर्वरूपेणास्य स्वीकृति: सञ्जाता । फाकुवेति ख्यातो दौलोत्सव: असमीयाजनै: बहुकालादेव पालित: जायते। विशेषत: 'नामनि-असम' इत्याख्ये असमराज्यांशे बाहुल्येन पालिते अस्मिन् पर्वणि सर्वे जना: पारस्परिकसौहार्देन प्रेम्ना सम्प्रीत्या गुणग्राहिमनोभावेन च परस्परं मिलन्ति । होलिकादहनमुदिश्य प्रारब्धमानस्य होलिकोत्सवस्य प्रचलिताभ्य: कथाभ्य: एतत् ज्ञायते यत् अपशक्ते: पराजयादनन्तरं विजयोल्लासेन हर्षोल्लासेन च उत्सवानाम् अनुष्ठानानाम् आयोजनं भवति, एतेनैव दौलोत्सवस्य विशेषतात्पर्यं प्रकाशमायाति । यद्यपि अस्माकं देशे अनेका: उत्सवा: भवन्ति, परन्तु तेषु उत्सवेषु होलिकोत्सव: अनन्यसाधारण:, अतीव उत्साहवधर्क: चास्ति। उत्सवेऽस्मिन् मनुष्या: मनुष्यान् प्रत्यभिगच्छन्ति, आध्यात्मिकाधिदैविकाधि-भौतिकदु:खत्रयं शोकसन्तापं दारिद्र्यम् च विहाय मनुष्या: मनुष्यान् आलिङ्गन्ति स्वसमीपमाकर्षयन्ति च। अद्य उत्सवोऽयं सार्वजनीन:, धनिकानां निर्धनानां सर्ववर्णानां सर्वजनानां संयमिनाम् असंयमिनाञ्च इति शम् ।

**प्रमुखशब्दा: -** दौलोत्सव:, होलिकादहनम्, राष्ट्रियपर्व, सार्वजनीन:, गुरुत्वम्

**उपोद्घात:**

साधारणत: यस्य आयोजनेन जना: नवकर्मप्रेरणया उद्‌बुद्धा: भवन्ति स एव उत्सव: इति वक्तुं शक्यते। पृथिव्या: भिन्ना: जात्युपजाति-धर्मावलम्बिनै: जनै: भिन्नेषु समयेषु भिन्ना: उत्सवा: आयोज्यन्ते। प्रत्येकस्य उत्सवस्य स्वकीयता अस्त्येव। फल्गुत्सव: होलि उत्सवो वा वर्णोत्सव: भवति। उत्सवमिमं वसन्तस्य हर्षोल्लासस्य आनन्दस्य च प्रतीकरूपेण मन्यते। प्राचीनकालात् अद्यावधि भारतवर्षस्य भिन्नधर्माव-लम्बिनै: विशेषत: हिन्दुधर्मावलम्बिनै: लोकै: उत्सवोऽयं अनुष्ठीयते।(फल्गुत्सव:, ब्रह्मज्योति:, पृष्ठम् ७७) वसन्तकालस्य पूर्णिमातिथौ एव सूर्यस्य उत्तरायणस्य[1] (उत्तरायणम्, स्तुडेन'च् संस्कृत-ईंलिश् डिक्चनेरी, पृष्ठम् १०१) प्रारम्भ: जायते। उत्तरायणस्य प्रादुर्भावादेव वैदिकऋषय: नववर्षगणनामकुर्वन्, तथा च साम्प्रतं नववर्षस्य उत्सवारम्भ: दौलयात्रया एव भवति। वसन्तऋतौ नववर्षागमने प्रकृत्या: नवरागरङ्गे उद्वेलितस्य उत्फुल्लस्य च मनुष्यस्य हर्षोल्लासस्य प्रतीकात्मकोत्सवऽयं दौलोत्सव: (दौलोत्सव:, आध्या-त्मिक-प्रबन्ध-कल्पतरु:, पृष्ठम् ११९)। दौलोत्सव: नामधेय: इदं पर्व भारतीयपर्वसु गुरुत्वपूर्णमस्ति।

दौलोत्सवः सर्वसाधारणानां कृते प्रियः उत्सवः अस्ति। उत्सवोऽयम् भारतस्य प्रख्यात: उत्सवः अस्ति। अधुना राष्ट्रियपर्वरूपेणास्य स्वीकृतिः सञ्जाता। तर्हि हिन्दुधर्मीयोत्सवोऽयं वस्तुत: सर्वभारतीयोत्सव: भवति।

**उत्पत्तिः**

होलिकोत्सवस्य उत्पत्तेः सन्दर्भे बहव: पौराणिक्य: कथा: प्रचलिता: सन्ति। तर्हि एकेन कथानुसारेण श्रूयते यत् पुरा किल हिरण्यकशिपुः नाम राजा बभूव। तस्य पुत्र प्रह्लाद: भगवद्भक्त: अभवत्। हिरण्यकशिपुः ईश्वरभक्तं स्वपुत्रं घातयितुम् अयतत। वासनाप्रतिमूर्तिः होलिका हिरण्यकशिपो: अनुजा आसीत्। हिरण्यकशिपुः स्वभगिनीं होलिकां प्रह्लादस्य वधस्य कृते न्ययोजयत्। सा च भक्तप्रह्लादं क्रोडे संस्थाप्य वह्निना देदीप्यमाने काष्ठचये उपविष्टा। अग्नौ होलिका तु भस्मसात् अभवत् परन्तु प्रह्लाद: विष्णुप्रसादेन सुरक्षितः आसीत्। तत् स्मर्तुं जना: होलिकादाहमनुकुर्वन्ति। अन्ते च भगवान् नृसिंहः हिरण्यकशिपुम् अहन्। होलिका दहनमुदिश्य होलिकोत्सवः प्रारभत । अयमुत्सवः फाल्गुनमासस्य पूर्णिमायां मन्यते । अस्याम् एव रात्रौ तस्या: दाह: भवति। होलिकादाहस्थाने एक: वंशस्तम्ब: स्थापितो भवति। बालका: शुष्केन्धनानि संगृह्य तत्स्थाने आनयन्ति। तत्पश्चात् काष्ठानि शुष्कगोमयखण्डानि च एकत्रीकृत्य तस्य तृणादिसमूहस्य दाह: कुर्वन्ति। द्वितीये दिवसे होलिकारज: स्पर्शमहोत्सवो भवति। दिवसेऽस्मिन् जना: स्वगृहे सुमिष्टानि खाद्यद्रव्यानि अपि पच्यन्ते।

**उद्यापनकाल:**

पुरा काले संवत्सरस्य अन्तिमे भागे अर्थात् चैत्रमासे उत्सवोऽयमनुष्ठीयते स्म। चैत्रमासं मधुमासमिति कथ्यते। प्राचीनकाले मधुमासे एव दौलोत्सव: पालितो जायते, एकादशशतिकायां पद्मपुराणे अपि अस्य उल्लेख: प्राप्यते (तत्रैव, पृष्ठम् १२१)। गरुडपुराणेऽपि चैत्रमासे दौलोत्सवस्य विधानमस्ति। तथा च हरिभक्तिविलासनामके ग्रन्थे एवंरूपेण लभ्यते-

**चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च।**
**नित्यपूजां विधायाथ कुर्याद्दौलोत्सवं व्रती।।**
**तदर्थञ्च विशेषेण नैवेद्यादिसमर्पयेत्।**
**संमान्य वैष्णवांस्तैश्च गीतनृत्यादि कारयेत्।।**
**महानीराञ्जनं कृत्वा प्रक्षिप्येदच्युतोपरि।**
**गन्धानुलेपचूर्णानि विचित्राणि विभागशः।।**
**सन्तोष्य वैष्णवांस्तैश्च गीतनृत्यादिभिः प्रभुम्।**
**नत्वाभ्यर्थ्याप्रमत्तः दोलामारोहयेच्छुभाम्।।**
**नीत्वा वहिर्वेदिकायामुत्तुङ्गायां यथाविधि।**
**अभ्यर्च्यान्दोलयेत् कृष्णं सर्वलोकावलोकितम्।।**
**एवमभ्यर्चयन् यामे यामे त्वान्दोलयन् प्रभुम्।**
**महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः।।**
**एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः।**
**प्रणम्य निर्मञ्छ्य कृष्णं स्वमालयमानयेत्।।**
**चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम्।**
**दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ।।**

(वहागमहीया देउल, स्मृतिग्रन्थ:,बङ्गालीकुछि-राजहुआ-दौलोत्सव:, पृष्ठम् ४७)

षोडशशतिकात: उत्सवोऽयं राधाकृष्णस्य दौलयात्रया सह एकीभूते सति फाल्गुनमासस्य पूर्णिमातिथ्यामेव उत्सवोऽयं स्थिरीक्रियते। अर्थात् परवर्तियुगे फाल्गुनस्य पूर्णिमातिथित: एव उत्सवोऽयं पालित: भवति। पद्मपुराणस्य पातालखण्डे दौलयात्राया: कालविषये प्राप्यते यथा –

**विशेषत: कलियुगे दौलोत्सवो विधीयते।**
**फाल्गुने चतुर्दश्याम् अष्टमे यामसंज्ञके।।**
**अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसस्मितौ।**
**पूजयेद् विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्विधैः।।**
**सितरक्तैः गौरपीतैः कर्पूरादिविमिश्रितैः।**
**हरिद्राक्षायोगाच्च रङ्गरम्यैर्मनोहरैः।**
**अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम्।।** (तत्रैव, पृष्ठम् ४६)

**साम्प्रतिककाले अस्य गुरुत्त्वं प्रासङ्गिकत्वञ्च**

फाकुवेति ख्यातो दौलोत्सव: असमीयाजनैः बहुकालादेव पालित: जायते । विशेषत: 'नामनि-असम' इत्याख्ये असमराज्यांशे बाहुल्येन पालिते अस्मिन् पर्वणि सर्वे जना: पारस्परिकसौहार्देन प्रेम्ना सम्प्रीत्या गुणग्राहिमनोभावेन च परस्परं मिलन्ति। न केवलं लोका:, अपितु तरव: शुष्काणि जीर्णानि पर्णानि परित्यज्य नूतनानि किसलयानि धारयन्ति। अपि च शिशिर: ह्रास: जायते, उष्णता च नाधिका भवति । मन्दं मन्दं पवन: नुदति। रमणीये समयेऽस्मिन् प्रकृति: सुजला सुफला शस्यश्यामला विभाति। आम्रवृक्षेषु चूतमञ्जर्य: शोभन्ते। नवीना: वल्लर्य: पुष्पभारैः विराजन्ते। प्रकृतौ परिवर्तनमिदं वसन्तपञ्चम्या: एव आरभते। अवसरेऽस्मिन् ग्रामनिवासिन: लोका: प्राय: अन्योन्यगेहान् गत्वा नृत्यगीतवाद्यादिकञ्च कुर्वन्ति, वयोज्येष्ठान् प्रणमन्ति, समवयस्कान् आलिङ्गन्ति, बालान् स्नेहचुम्बनेन मिष्टान्नेन च प्रीणयन्ति। होलिकोत्सवे लोका: परस्परं रंङ्गरञ्जितम जलं प्रक्षिपन्ति, अपि च कुङ्कुमद्रव्यचूर्णेन लिम्पन्त: सन् परमं रमन्ते। जनाः उत्सवावसरे नृत्यन्ति गायन्ति च। आबालवृद्धवनिता: हास्यव्यङ्ग्यसंलापान् कुर्वन्ति ।

साम्प्रतिके समये वयं पश्याम: यत् दौलोत्सवस्य पूर्ववर्तिनि दिने अर्थात् फाल्गुनमासस्य शुक्लचतुर्दश्यां तिथौ सान्ध्यसमये रात्रौ वा माघविहूत्सवस्य भेलागृहस्य आकृत्या शुष्कपत्रैः वंशैः काष्ठैः च निर्मिते गृहे अग्निसंयोग: क्रियते। गृहमिदं रिक्ते क्षेत्रे, नद्या: तीरे, जलाशयस्य

पार्श्वभागे, द्वि-त्रि-चतुर्मागस्य संयोगस्थले वा निर्मीयते (दौलोत्सवः, आध्यात्मिक-प्रबन्ध-कल्पतरुः, पृष्ठम्, १२०)। उक्तं गृहं होलिकागृहस्य प्रतीकरूपं भवति। तत्पश्चात् परवर्तिनि दिने अर्थात् फाल्गुनस्य पूर्णिमायां वर्णस्य उत्सवः विजयोत्सवो वा पाल्यते। समग्रे एव भारतवर्षे उत्सवोऽयं जनैः महतोत्साहेन हृद्या च पाल्यते। होलिकागृहदहनात् अनन्तरं नृत्यगीतादिकम् आयोज्यते। भारतवर्षस्य प्रायः सर्वस्मिन् स्थाने एषा प्रथा प्रचलिता दृश्यते। अग्न्युत्सवेऽस्मिन् शिशूनां यूनामपितु सर्वसाधारणानां आनन्दोल्लासः भवतीति अयं उत्सवः 'चाचर' नाम्ना अपि ज्ञायते। 'चाचर' शब्दः 'चर्चरी' इति संस्कृतशब्दात् आयाति, शब्दस्यार्थः आनन्दः हर्षध्वनिः वा (तत्रैव)। मेजिगृहे भेलागृहे अग्न्याधानप्रथातिरिक्ते कुत्रचित् स्थाने एका प्रथा विद्यते यत् एकं मेषम् अजं वा भेलागृहे संस्थाप्य तत्गृहे अग्निसंयोगः क्रियते। तथा च कस्मिन् स्थाने मेषशरीरे अजशरीरे वा केवलं अग्निस्पर्शं कृत्वा एव तत्पशुं बन्धनात् मुञ्चति। दौलयात्रायां वह्न्युत्सवपर्वसन्दर्भे चाचरपूजायाः मन्त्रे प्राप्यते यथा –

**विष्णु-रूद्र समुद्भुतः महाशन-हुताशनः**
**मेष-मन्दिर दाहेऽत्र समुद्भवः शिख-भवः।**
**प्रदक्षिणेन धारन्तं कौतुकात् सह विष्णुना**
**प्रदक्षिणं दक्षिणाग्रे कुरुकृष्ण विशेषतः॥** (तत्रैव, पृष्ठम्, १२१)

होलिकोत्सवः वस्तुतः कृषिमूलकोत्सवः इति पण्डितानां मतम्। अधिकशस्योत्पादनकामनया तथा च, यथा शस्यानां कापि क्षतिर्न भवेत् इति आशया एव एवंविधानां पूजानामुत्सवानां वा सृष्टिर्भवतीति नास्त्यत्र संशयः। कृषकानां मनोरथपूरणाकाङ्क्षा उत्सवानुष्ठानस्य माध्यमेन दृग्गोचरी भवति। पूजानुष्ठानेषु नृत्य-गीतादिनामानन्दोल्लासानां बाहुल्येन प्रयोगेन उत्सवानां सर्वथा सौन्दर्यवृद्धिर्भवति (तत्रैव, १२२)।

**उपसंहारः**

परिशेषे एतदेव वक्तुं शक्यते यत् इदं पर्व मानवानां कृते अद्वितीयम् उपहारमस्ति। होलिकादहनमुदिश्य प्रारब्धमानस्य होलिकोत्सवस्य प्रचलिताभ्यः कथाभ्यः एतत् ज्ञायते यत् अपशक्तेः पराजयादनन्तरं विजयोल्लासेन हर्षोल्लासेन च उत्सवानाम् अनुष्ठानानाम् आयोजनं भवति, एतेनैव दौलोत्सवस्य विशेषतात्पर्यमपि प्रकाशमायाति। यद्यपि अस्माकं देशे अनेकाः उत्सवाः भवन्ति, परन्तु तेषु उत्सवेषु होलिकोत्सवः अनन्यसाधारणः, अतीव उत्साहवधर्कः चास्ति। उत्सवेऽस्मिन् मनुष्याः मनुष्यान् प्रत्यभिगच्छन्ति, आध्यात्मिकाधि-दैविकाधिभौतिकदुःखत्रयं शोकसन्तापं दारिद्र्यम् च विहाय मनुष्याः मनुष्यान् आलिङ्गन्ति स्वसमीपमाकर्षयन्ति च। अद्य उत्सवोऽयं सार्वजनीनः, धनिकानां निर्धनानां सर्ववर्णानां सर्वजनानां संयमिनाम् असंयमिनाञ्च ।

**ग्रन्थानुक्रमणी**

आध्यात्मिक-प्रबन्ध-कल्पतरुः, दौलोत्सवः, मतिदेवशास्त्रिणा विरचितम्, प्रिण्टोमेटिकच् प्रकाशितम्, मङ्गलदै, असमप्रदेशः, पुनर्मुद्रितम् , २००२

ब्रह्मज्योतिः फल्गुत्सवः, कल्याणकुमारगोस्वामिना विरचितम्, मुकुटशर्मवरुआ सम्पादितम्, ऊनचत्त्वारिंशत् प्रकाशः, पाहि लेजर प्रिण्टच् प्रकाशितम्, मङ्गलदै, असमप्रदेशः, २०२०

स्तुडेन'च् संस्कृत-ईंलिश डिक्चनेरी वामन-शिवराम्-आप्टेन सम्पादितम्, मोतिलाल वनार्सीदासप्रकाशितम्, नव देल्ही, पुनर्मुद्रितम्, २०००

स्मृतिग्रन्थः, वङ्गालीकुछि-राजहुआ-दौलोत्सवः, हीरक जयन्ती प्रकाशः वहागमहीया देउल, प्रभातचन्द्रशर्मशास्त्रिणा विरचितम्, परशमणिशर्मणा सम्पादितम्, महामाया प्रेसप्रकाशितम्, रङिया, असमप्रदेशः, १९९८

**सन्दर्भ**

[1]षण्मासा उत्तरायणम् *Bhagavadgītā* 8.24; (क) The progress of the sun to the north (of the equator), (ख) The period or time of the summer solstice.